This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक

हस्तलिखित संग्रह

दाखल क्र M 291 विषय काव्य

नाव. रघुवंशम् (४सर्ग) मुद्रित

लेखक/लिपीकार कालिदास

पृष्ठ 18 काळ शके 1782 पूर्ण/~~अपूर्ण~~

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथरघुवंशेमहाकाव्येचतुर्थः सर्गःप्रारभ्यते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रघु॰टी॰ श्रीगणेशायनमः शारदाशारदांभोजवदनावदनांबुजे सर्वदासर्वदास्माकंसन्निधिंसन्निधिंक्रियात् १ सइति सरघुःगुरुणापि स-
१ त्रादत्तंराज्यं राज्ञःकर्म प्रजापालनात्मकं पुरोहितादित्याद्यक् प्रतिपद्य प्राप्य दिनांतेसायंकाले सवित्रासूर्येणनिहितंतेजः प्रतिपद्यहुता ४
शनोग्निरिव अधिकंबभौ सौरतेजसःसायमग्निसंक्रमे आदित्योवाअस्तंयन्नग्निमनुप्रविशति अग्निंवाआदित्यःसायंप्रविशती

सराज्यंगुरुणादत्तंप्रतिपद्याधिकंबभौ दिनांतेनिहितंतेजःसवित्रेवहुताशनः १
दिलीपानंतरंराज्येतं निशम्यप्रतिष्ठितम् पूर्वंप्रधूमितोराज्ञांहृदयेग्निरिवोत्थितः २

त्यादिश्रुतिःप्रमाणम् १ दिलीपेति दिलीपानंतरंराज्येप्रतिष्ठितमवस्थितं तंरघुंनिशम्याकर्ण्य पूर्वंदिलीपकाले राज्ञांहृदये प्रकर्षे
णधूमोस्यसंजातःप्रधूमितः अग्निःसंतापाग्निः उत्थितइवप्रज्वलितइवपूर्वादप्यधिकः संतापोभूदित्यर्थः राजकर्तृकस्यापिनिश १
मनस्याग्नावुपचारान्नसमानकर्तृकत्वविरोधः २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पुरुहूतेति पुरुहूतध्वजः इंद्रध्वजः सकिलवृष्ट्यर्थं राजभिः पूज्यत इत्युक्तम् भविष्योत्तरपुराणे एवं यः कुरुते यात्रामिंद्रकेतोर्युधिष्ठि
र पर्जन्यः कामवर्षी स्यात्तस्य राज्येन संशय इति पुरुहूतध्वजस्येव तस्य रघोः नवाभ्युत्थानं अभ्युन्नतिमभ्युदयं च पश्यंतितन्वंतीं
लाः नवाभ्युत्थानदर्शिन्यः ऊर्ध्वंप्रस्थिता उल्लसिताश्च नयनपंक्तयो यासां ताः सप्रजाः ससंतानाः प्रजाः प्रजास्यात्संततौ जन इत्युभ

पुरुहूतध्वजस्येव तस्योन्नयनपंक्तयः नवाभ्युत्थानदर्शिन्यो ननंदुः सप्रजाः प्रजाः ३
सममेव समाक्रांतं द्वयं द्विरदगामिना तेन सिंहासनं पित्र्यमखिलं चारिमंडलम् ४

यत्राप्यमरसिंहः ननंदुः ३ सममिति द्विरद इव द्विरदैश्च वा गच्छतीति द्विरदगामिना कर्नर्युपमाने कर्त्र्यजातावितिणिनिः ते-
न रघुणा सममेव युगपदेव द्वयं समाक्रांतमधिष्ठितं किं नत् द्वयं पितुरागतं पित्र्यं पितुर्यच्चेति यत्प्रत्ययः सिंहासनं अखिलम-
रीणां मंडलं राष्ट्रं च ४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथसिंहासनारोपणानंतरं तस्यलक्ष्मीसन्निधानमाह छायेति अत्ररघोस्तेजोविशेषेणस्वयंसन्निहितयालक्ष्म्याछत्रधारणंकृतमि-
त्युत्प्रेक्षते पद्मालक्ष्मीः लक्ष्मीःपद्मालयापद्मेत्यमरः सास्वयमदृश्याकिल किलेतिसंभावनायाम् सती छायामंडललक्ष्येणकांतिपुं-
जानुमेयेन नतुस्वरूपतोदृश्येन छायामंडलमित्यनेनानपज्ञानंदृश्यते छायासूर्यप्रियाकांतिः प्रतिबिंबमनातपइत्युभयत्राप्यमरः
तेनपद्मातपत्रेण पद्ममेवातपत्रंतेनकारणभूतेन साम्राज्यदीक्षितं साम्राज्ये साम्राज्यकर्मणिमंडलाधिपत्येदीक्षितं अभिषिक्तंतं-

छायामंडललक्ष्येणतमदृश्याकिलस्वयं पद्मापद्मातपत्रेणभेजेसाम्राज्यदीक्षितम् ५
परिकल्पितसान्निध्याकालेकालेचबंदिषु स्तुत्यंस्तुतिभिरर्थ्याभिरुपतस्थेसरस्वती ६

भेजे अन्यथाकथमेतादृशीकांतिसंपत्तिरितिभावः ५ संप्रतिसरस्वतीसान्निध्यमाह परिकल्पितेति सरस्वतीकालेसर्वेष्वपि योग्यकालेषु
नित्यवीप्सयोरितिवीप्सायांद्विर्वचनं बंदिषुपरिकल्पितसान्निध्याकृतसन्निधानासती स्तुत्यंस्तोत्रार्हंरघुं अर्थ्याभिरर्थादनपेताभिः धर्मपत्यर्थ
न्यायादितियत्प्रत्ययः स्तुतिभिःस्तोत्रैरुपतस्थे देवताबुद्ध्यापूजितवतीत्यर्थः देवतात्वंच नाविष्णुःपृथिवीपतिरितिवा लोकपालात्मकत्वाद्वेत्य-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नुसंधेयम् एवंचसति उपाद्देवपूजांसंगतिकरणमित्रीकरणपथिष्विति वाच्यमित्यनेनात्मनेपदंसिध्यति ६ मन्विति वसुंधरामनुप्रभृतिभिर्म-
न्वादिभिर्मान्यैःपूज्यैः राजभिर्भुक्तायद्यपिभुक्तैवेत्यर्थः यद्यपीत्यवधारणे अप्यर्थेयदिवार्थेस्यादितिकेशवः तथापितस्मिन्राज्ञिअन्यःपू
र्वोयस्याःसाअन्यपूर्वा अन्यपूर्वानभवतीत्यनन्यपूर्वा अनन्योपभुक्तेवासीत् तत्प्रथमपतिकेवानुरक्तवतीत्यर्थः ७ अत्रकारणमाह सइति हि
यस्मात्कारणात् सरघुःयुक्तदंडतयायथापराधदंडतयासर्वस्यलोकस्यमनआददेजहार कथमिव अतिशीतोत्कृष्णोवानभवतीतिनातिशी

मनुप्रभृतिभिर्मान्यैर्भुक्तायद्यपिराजभिः तथाप्यनन्यपूर्वेवतस्मिन्नासीद्वसुंधरा ७ सहिसर्वस्यलोकस्ययुक्त
दंडतयामनः आददेनातिशीतोष्णोनभस्वानिवदक्षिणः ८ मंदोत्कंठाःकृतास्तेनगुणाधिकतयागुरौ फलेनसह
कारस्यपुष्पोद्गमइवप्रजाः ९ तोष्णः नञर्थस्यनशब्दस्यसुप्सुपेतिसमासः दक्षिणोदक्षिणदिग्भवोनभस्वान्वायुरिव मलयानिलइवे
त्यर्थः युक्तदंडतयेत्यत्रक्रमंदकःउद्वेजयतितीक्ष्णेनमृदुनापरिभूयते दंडेननृपतिस्तस्माद्युक्तदंडःप्रशस्यतइति ८मंदेति तेनरघुणाप्रजाःगुरौदिली
पविषयेसहकारःअतिसौरभश्चूतः आम्रश्चूतोरसालोसौसहकारोतिसौरभइत्यमरः तस्यफलेनपुष्पोद्गमेपुष्पोदयइव ततोऽपिगुणाधिकतयाहे-
तुना मंदोत्कंठाःअल्पोत्कंठाःकृताः गुणोत्तरश्चउत्तरोविषयः पूर्वंविस्मारयतीतिभावः ९ ७ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रघु॰टी॰ नयेति नयविद्भिर्नीतिशास्त्रज्ञैः नवेतस्मिन्राज्ञिविषये तमधिकृत्येत्यर्थः सत् धर्मयुद्धादिकं असत्कूटयुद्धादिकं चोपदर्शितं तस्मिन्राज्ञि स॰
३ पूर्वएवपक्षःअभवत् संक्रांतइत्यर्थः उत्तरःपक्षोनाभवत् तत्रसदसतोर्मध्येसदेवाभिमतंनासत् तज्ज्ञानंतुहानार्थमेवेत्यर्थः पक्षःसा ४
धनयोग्यार्थः पक्षःपार्श्वगरुत्साध्यसाहायबलभित्तिषुतिकेशवः १० पंचानामिति पृथिव्यादीनांपंचानांभूतानामपिगुणाःगंधादयः

नयविद्भिर्नवेराज्ञिसदसच्चोपदर्शितम् पूर्वएवाभवत्पक्षस्तस्मिन्नाभवदुत्तरः १० पंचानामपिभूतानामुत्क
र्षंपुपुषुर्गुणाः नवेतस्मिन्महीपालेसर्वंनवमिवाभवत् ११ यथाप्रल्हादनाच्चंद्रः प्रतापात्तपनोयथा तथै
वसोभूदन्वर्थोराजाप्रकृतिरंजनात् १२

उत्कर्षमतिशयंपुपुषुः अन्योन्यश्लेषात्ते तस्मिन्नृपेनामनवेमहीपालेसतिसर्वंव
स्तुजातंनवमिवाभवत् तदेवभूतजातमिदानीमपूर्वगुणयोगादपूर्वमिवाभवदितिभावः ११ यथेति यथाचंदयत्याल्हादयतीतिचंद्रः
इंदुः चदिधातोरौणादिकोरप्रत्ययः प्रल्हादनादाल्हादकरणादन्वर्थोऽनुगतार्थनामकोऽभूत् यथाच तपतीतितपनः सूर्यः नंद्यादित्वाल्ल्यु
प्रत्ययः प्रतापात्तापजननादित्यर्थः तथैवराजाप्रकृतिरंजनादित्यर्थः सार्थकराजशब्दोभूत् यद्यपिराजशब्दोराजतेर्दीप्त्यर्थात्कनिन्प्रत्ययां ३
तो ननुरंजेः तथापिधातूनामनेकार्थत्वाद्रंजनाद्राजेस्तत्कंकविना १२ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

काममिति विशालेतस्यरघोर्लोचने कामंकर्णांतयोःर्विश्रांते कर्णप्रांतगते आस्तांचक्षुषोभावश्चक्षुष्मत्तातु चक्षुषःफलंत्वित्यर्थः सू-
क्ष्मान्कार्यार्थान् कर्तव्यार्थान्दर्शयतीति प्रकाशयतीतितत् सूक्ष्मकार्यार्थदर्शिनाशास्त्रेणेवासीत् शास्त्रंदृष्टिर्विवेकिनामितिभावः १३
लब्धेति अथलब्धस्यराज्यस्यरक्षापौरजनस्यदेशनगरग्रामेषुगुप्तिः तथायोधानामपिसंग्रहोपि तुलयोर्मानव्यवस्थापनम् साम्यं

कामंकर्णांतविश्रांतेविशालेतस्यलोचने चक्षुष्मत्तातुशास्त्रेणसूक्ष्मकार्यार्थदर्शिना १३ लब्धप्रशमनस्व-
स्थमथैनंसमुपस्थिता पार्थिवश्रीर्द्वितीयेवशरत्पंकजलक्षणा १४ निर्वृष्टलघुभिर्मेघैर्मुक्तवर्त्मासुदुःस
हः प्रतापस्तस्यभानोश्चयुगपद्व्यानशेदिशः १५

लिंगिषुदानवृत्तिकरणेत्यागः सतामर्चनं कार्याण्येवमहीभुजाप्रशमना
न्येनानिराज्येनवेइति प्रशमनेनपरिपंथिनामनुरंजनप्रतीकाराभ्यांस्थिरीकरणेनस्वस्थंसमाहितचित्तमेनंरघुंपंकजलक्षणापद्मचिन्हाश्रि-
योपिविशेषणमेतत् शरत्द्वितीयापार्थिवश्रीःराजलक्ष्मीरिवसमुपस्थिताप्रापा १४ निर्वृष्टेति निःशेषंवृष्टाःनिर्वृष्टाःकर्तरिक्तः अतए
वलघवःतैर्मेघैःमुक्तवर्त्मात्यक्तमार्गःअतएवसुदुःसहःतस्यरघोःभानोश्चप्रतापःपौरुषमातपश्च प्रतापोपौरुषातपावितियादवःयुगप
त् दिशोव्यानशेव्याप १५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वार्षिकमिति इंद्रःवर्षासुभवंवार्षिकंवर्षानिमित्तमित्यर्थः वर्षाभ्यष्ठगिनिठक्प्रत्ययः धनुःसंजहार रघुःजैत्रंजयशीलंजेतृशब्दात्तृन्नंता
प्रज्ञादिभ्यश्चेति स्वार्थेअण्प्रत्ययः धनुर्दधौ हियस्मात्ताविंद्ररघूप्रजानामर्थस्यप्रयोजनस्य दृष्टिविजयलक्षणस्यसाधनविषयेपर्यायेणोद्य
तेकार्मुकेयाभ्यांतौपर्यायोद्यतकार्मुकौ पाठांतरेपर्यायेणोद्यमोविश्रमश्चययोस्तौपर्यायोद्यमविश्रमौ द्वयोःपर्यायकरणादक्लेशइतिभा

वार्षिकंसंजहारेंद्रोधनुर्जैत्रंरघुर्दधौ प्रजार्थसाधनेतौहिपर्यायोद्यतकार्मुकौ १६ पुंडरीकातपत्रस्तंविलसत्
काशचामरः ऋतुर्विडंबयामासनपुनःप्रापतच्छ्रियम् १७ प्रसादसुमुखेतस्मिंश्चंद्रेचविशदप्रभे तदाचक्षु
ष्मतांप्रीतिरासीत्समरसाद्वयोः १८ वः १६ पुंडरीकेति पुंडरीकंसिताम्भोजमेवातपत्रंयस्यसः तथोक्तः विकसंति काशानिकाशा
ख्यतृणकुसुमान्येवचामराणियस्यसतथोक्तः ऋतुःशरदृतुःपुंडरीकनिभातपत्रंकाशनिभचामरंतंरघुंविडंबयामास अनुचकार तस्य॰
रघोःश्रियंपुनःशोभांतुनप्रापशोभासंपत्तिपक्षेस्याल्लक्ष्मीःश्रीरिवद्दश्यतेइतिशाश्वतः १७ प्रसादेति प्रसादेनसुमुखेतस्मिन्रघौविश॰
दप्रभेनिर्मलकांतौचंद्रेचतयोर्विषयेतदाचक्षुष्मतांप्रीतिरनुरागःसमरसासमस्वादतुल्येभोगेत्तियावत् रसोगंधेरसःस्वादइतिविश्वः आ
सीत् १८

४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हंसेति हंसानांश्रेणिषुपंक्तिषु ताराकनक्षत्रेषु कुमुदानियेषुसंतिकुमुद्वंति कुमुदप्रायेष्वित्यर्थः कुमुद्वान्कुमुदप्रायइत्यमरः कुमुदनडवेतसेभ्यो-
ड्मतुप् तेषुवारिषुच तदीयानांरघुसंबंधीनांयशसांविभूतयः संपदः पर्यस्ताइवप्रसारिताः किमित्युत्प्रेक्षाअन्यथाकथमेषामेषधवलिमे-
तिभावः १९ इक्ष्विति इक्षूणांछायाइक्षुछायं छायाबाहुल्यइतिनपुंसकत्वम् तत्रनिषण्णाइक्षुछायानिषादिन्यःस्त्रीलिंगपाठेइक्षोःछायेति
विग्रहः अन्यथाबहुत्वेनपुंसकत्वप्रसंगात् शालीन्गोपायंतिरक्षंतीतिशालिगोप्यःसस्यपालिकाःस्त्रियःकर्मण्यण् टिड्ढाणञित्यादिनाङीप् गो

हंसश्रेणीषुतारासुकुमुद्वत्सुचवारिषु विभूतयस्तदीयानांपर्यस्तायशसामिव १९ इक्षुछायनिषादिन्य
स्तस्यगोप्तुर्गुणोदयं आकुमारकथोद्घातंशालिगोप्योजगुर्यशः २०

प्तुःरक्षकस्यतस्यरघोःगुणेभ्यःउदयोयस्यत
द्गुणोदयंगुणोत्पन्नं आकुमारंकुमारादारभ्यकथोद्घातःकथारंभोयस्यतत् कुमारैरपिस्तूयमानमित्यर्थः यशोजगुःगायंतिस्म अथवाकु
मारस्यसतो रघोर्याःइंद्रविजयादयः ततआरभ्यआकुमारकथं तत्राप्यभिविधावव्ययीभावःआकुमारकथंउद्घातोयस्मिन्कर्मणिगान-
क्रियाविशेषणमेतत्स्यादभ्यादानमुद्घातआरंभइत्यमरः आकुमारकथोद्भूतमितिपाठेकुमारस्यसतस्तस्यकथाभिश्चरित्रैरुद्भूतंप्रवृत्तंयशः तद्यश
आरभ्ययशोजगुरितिव्याख्येयम् २१ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रससादेतिमहौजसः कुंभयोनेरगस्त्यस्य अगस्त्यः कुंभसंभवइत्यमरः उदयादंभः प्रससाद प्रसन्नंबभूव महौजसोरघोरुदयात्परिभवा स
शंकिद्विषतांमनश्चुक्षुभे कालुष्यंप्राप अगस्त्योदयेजलानिप्रसीदंतीत्यागमः २१ मदेति मदोदग्राः मदोद्धताः ककुदेषामस्तीतिककुद्मंतः ४
महाककुदइत्यर्थः यवादित्वान्मकारस्यवत्वाभावः सरितांकूलानिउद्रुजंतीतिकूलमुद्रुजाः यदिकूलेरुजिवहोरितिखश्प्रत्ययः अरु
र्द्विषेत्यादिनामुमागमः महोक्षाः महांतः उक्षाणः महोक्षाः अचतुरेत्यादिनानिपातनादकारांतः लीलारवेलंविलासस्फुभगंतस्यरघोरुत्साहव

प्रससादोदयादंभः कुंभयोनेर्महौजसः रघोः परिभवाशंकिचुक्षुभेद्विषतांमनः २१ मदोदग्राः ककुद्मंतः सरि
तांकूलमुद्रुजाः लीलारवेलमनुप्रापुर्महोक्षास्तस्यविक्रमं २२ प्रसवैःसप्तपर्णानांमदगंधिभिराहताः असूयये
वतन्नागाः सप्तधैवप्रसुस्रुवुः २३

तोवपुष्मतः परभंजकस्यविक्रमंशौर्यमनुप्रापुः अनुचक्रुः २२ प्रसवैरिति मदस्येवगंधोयेषां-
नैर्मदगंधिभिः उपमानाच्चेतिसमासांतइकारः सप्तपर्णानांवृक्षविशेषाणां सप्तपर्णोविशालत्वक्शारदोविषमच्छदइत्यमरः प्रसवैः पुष्पैः आ ५
हतास्तस्यरघोर्नागागजाः गजेपिनागमातंगावित्यमरः असूययेव आहतिनिमित्तयास्पर्धयेवसप्तधैवप्रसुस्रुवुः मदंववृषुः प्रतिगजगंधाभि
मानादितिभावः करात्कटाभ्यांमेढ्राच्चनेत्राभ्यांचमदस्रुतिरितिपालकाव्ये करान्नासारंध्राभ्यामित्यर्थः २३ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सरितइति सरितोगाधाः स्वल्पनराः कुर्वतीपथोमार्गाश्च आश्यानकर्दमान् शुष्कपंकान्कुर्वती संयोगादेरातोधातोर्यण्वत इतिश्यतेर्निष्ठान
त्वं शरत्‌शरहतुः तंरघुं शक्तेरुत्साहशक्तेः प्रथमंप्राक् यात्रायैदंडयात्रायै प्रेरयामास चोदयामास प्रभुमंत्रशक्तिसंपन्नस्यतस्य-
शरत्स्वयमुत्साहमुत्पादयामासेत्यर्थः २४ तस्माइति वाजिनामश्वानांनीराजनाख्येशांतिकर्मणि सम्यक्‌विधिवत् हुतोहोम-

सरितःकुर्वतीगाधाःपथश्चाश्यानकर्दमान् यात्रायैप्रेरयामासतंशक्तेःप्रथमंशरत् २४
तस्मैसम्यक्हुतोवन्हिर्वाजिनीराजनाविधौ प्रदक्षिणार्चिर्व्याजेनहस्तेनेवजयंददौ २५

समिद्धोवन्हिः प्रगतादक्षिणाप्रदक्षिणं तिष्ठद्गुप्रभृतित्वादव्ययीभावः प्रदक्षिणंयाअर्चिः ज्वालातस्याव्याजेनहस्तेनेव तस्मैजयं
ददौ उक्तंमहायात्रायाम् इन्द्रः प्रदक्षिणगतोहुतभुङ्‌नृपस्यधात्रींसमुद्रवसनांवशगांकरोति वाजिग्रहणंगजादीनामप्युपल
क्षणंतेषामपिनीराजनाविधानात् २५ ❀ ❀ ❀ ❀ ❀

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सइति गुप्तोमूलंस्वनिवासस्थानंपर्यंतः प्रांतदुर्गंचयेन गुप्तमूलपर्यंतः शुद्धपार्ष्णिःउद्धृतदृष्टशत्रुः सेनयारक्षितदृष्टदेशोवाअ
यान्वितःशुभदैवान्वितः अयंशुभावहोविधिरित्यमरः सरघुः षड्विधंमौलभृत्यादिरूपंबलंसैन्यंमौलंभृत्यंसुहृच्छ्रेणिद्विषदाटविकं·
बलमितिकामंदकः आदायदिशांजिगीषयाजेतुमिच्छयाप्रतस्थे २६ अवाकिरन्निति वयोवृद्धाःपौरयोषितः तंरघुंप्रयांतं लाजैरा

सगुप्तमूलपर्यंतःशुद्धपार्ष्णिरयान्वितः षड्विधंबलमादायप्रतस्थेदिग्जिगीषया २६ अवाकिरन्वयोवृद्धास्तं
लाजैःपौरयोषितः पृषतैर्मंदरोद्धूतैःक्षीरोर्मयइवाच्युतम् २७ सययौप्रथमंप्राचींतुल्यःप्राचीनबर्हिषा
अहिताननिलोद्धूतैस्तर्जयन्निवकेतुभिः २८ २८ चारलाजैर्मंदरोद्धूतैःपृषतैर्बिंदुभिः क्षीरोर्मयःक्षीरसमुद्रोर्मयः

अच्युतंविष्णुमिव अवाकिरन्पर्यक्षिपन् २७ सइति प्राचीनबर्हिर्नामकश्चिन्महाराजइतिकेचित् इंद्रःपर्जन्योमघवावृषाहरिहरयः
प्राचीनबर्हिषस्तथेतींद्रपर्यायेषुहलायुधाभिधानात् तेनतुल्यःसरघुः अनिलेनानुकूलवातेनोद्धूतैःकेतुभिर्ध्वजैःअहितान्रिपून्त·
र्जयन्निवभर्त्सयन्निवतर्जिभर्त्स्योरनुदात्तेत्त्वेपिचक्षिङोङित्करणेनानुदात्तेत्त्वनिमित्तस्यात्मनेपदस्यानित्यत्वज्ञापनात्परस्मैपदमिति·
वामनःप्रथमंप्राचींदिशंययौ २८

स·
६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रजोभिरिति किंकुर्वन् स्यंदनोद्भूतैरजोभिः घनसन्निभैः वर्णतःक्रियातःपरिमाणतश्चमेघतुल्यैर्गजैः यथाक्रमंव्योमआकाशंभुव-
स्तलमिव भूतलंच व्योमेवकुर्वन् यथाविनिपूर्वेणसंबंधः २९ प्रतापइति अग्रेप्रतापस्तेजोविशेषःसप्रभावःप्रतापश्चयत्तेजः
कोशदंडजमित्यमरः ततःशब्दःसेनाकलकलः तदनंतरंपरागोधूलिः परागःपुष्परजसिधूलिस्नानीययोरपीतिविश्वः प-

रजोभिःस्यंदनोद्धूतैर्गजैश्चघनसन्निभैः भुवस्तलमिवव्योमकुर्वन्व्योमेवभूतलम् २९ प्रतापोग्रेततःश
ब्दःपरागस्तदनंतरम् ययौपश्चाद्रथानीकंचतुस्स्कंधेवसाचमूः ३० मरुपृष्ठान्युदंभांसिनाव्याःसुप्रतरा-
नदीः विपिनानिप्रकाशानिशक्तिमत्वाच्चकारसः ३१

श्चाद्रथादिरथाश्वादिकंचतुरंगंबलंइतीत्थंचतुःस्कंधेवचतुर्व्यू
हेव स्कंधःप्रकांडेकायेंसेविज्ञानादिषुपंचसु नृपेसमूहेचेतिहैमः रथानीकमितिपाठेइतिशब्दाध्याहारेणयोज्यम् ३०मर्विति सरघुः
शक्तिमत्वात्मरुपृष्ठानिनिर्जलस्थानानि समानौमरुधन्वानावित्यमरः उदंभांसिउद्भूतजलानिचकारनाव्याः नौभिस्तार्यानदीः नाव्यं
त्रिलिंगंनौतार्येइत्यमरः नौवयोधर्मविषमूलेत्यादिनायत्प्रत्ययः सुप्रतराःसुखेनतार्याश्चकार विपिनान्यरण्यानि अटव्यरण्यंविपि-
नमित्यमरः प्रकाशानिनिर्वृक्षाणिचकार तस्यागम्यंकिमपिनास्तीतिभावः ३१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सईति महतींसेनांपूर्वसागरगामिनींकर्षन् सरघुः हरस्यजटाभ्योभ्रष्टांगंगांकर्षन् सापिपूर्वसागरगामिनी भगीरथइवबभौ भगी
रथोनामकश्चित् कपिलदग्धानांसगराणांनप्तातत्पावनायहरकिरीटाद्गंगांप्रवर्तयितेनाराजा य त्संबंधाद्गंगाचभागीरथीतिगीय
ते ३२ त्याजितैरिति फलंलाभंवृक्षपक्षेप्रसवंचत्याजितैः त्यजेर्ण्यंतात् द्विकर्मकादप्रधानेकर्मणिक्तः स्वपदात्च्याविनैः अन्य-

ससेनांमहतींकर्षन्पूर्वसागरगामिनीम् बभौहरजटाभ्रष्टांगंगामिवभगीरथः ३२ त्याजितैःफलमुत्खातै
र्भग्नैश्चबहुधानृपैः तस्यासीदुल्बणोमार्गःपादपैरिवदंतिनः ३३ पौरस्त्यानेवमाक्रामंस्तांस्तान्जनपदा
न्जयी प्रापतालीवनश्याममुपकंठंमहोदधेः ३४ त्रोत्पाटितैः बहुधाभग्नैः रणेजितैः अन्यत्रछिन्नैः नृपैः पादपैः

दंतिनोगजस्येवतस्यरघोर्मार्गः उल्बणः प्रकाशः आसीत् प्रकाशंप्रकटंस्पष्टमुल्बणंविशदंस्फुटमितियादवः ३३ पौरस्त्यानिति ज
यीजयनशीलः जिदृक्षिविश्रीण्वमित्यादिनाइनिप्रत्ययः सरघुरेवं पुरोभवान्पौरस्त्यान्प्राच्यान् दक्षिणापश्चात्पुरसस्त्यगितित्य
कृप्रत्ययः तांस्तान्सर्वानित्यर्थः वीप्सायांद्विरुक्तिः जनपदान्देशान् आक्रामंस्तालीवनैःश्यामं महोदधेरुपकंठंअंतिकंप्राप ३४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अनम्राणामिति अनम्राणांकर्मणिषष्ठी समुद्दर्तु रुन्मू लयितुः तस्मात्रघोःसकाशात् भीत्रार्थानांभयहेतुरितिअपादानत्वात्पंचमी सिंधुरया
दिवनदीवेगादिवस्कस्कैःस्कस्वदेशीयैःस्कस्नादयःशब्दाजनपदवचनाः क्षत्रियमाचक्षते वैतसींवेतसःसंबंधिनींवृत्तिंप्रणतिमित्यर्थः
आश्रित्यआत्मासंरक्षितःअत्रकौटिल्यः बलीयसाभियुक्तोदुर्बलः सर्वत्रानुप्रणतोवैतसंधर्ममातिष्ठेदिति ३५ वंगानिति नेतानाय-
कःसरघुःनौभिः साधनैरुद्धतान्सन्नद्धान्वंगान्राज्ञः तरसाबलेन तरसीबलरंहसीतियादवः उत्खायोन्मूल्य गंगायाःस्रोतसांप्रवाहा

अनम्राणांसमुद्धर्तुस्तस्मात्सिंधुरयादिव आत्मासंरक्षितःस्कस्कैर्वृत्तिमाश्रित्यवैतसीं ३५ वंगानुत्खायतरसा
नेतानौसाधनोद्धतान् निचखानजयस्तंभान्गंगास्रोतोंऽतरेषुसः ३६आपादपद्मप्रणताःकलमाइवतेरघुं
फलैःसंवर्धयामासुरुत्खातप्रतिरोपिताः ३७

णांअंतरेषुजयस्तंभान्निचखानस्थापितवानित्यर्थः३६आपादेतिआपादपद्मंअं
घ्रिपद्मपर्यंतंप्रणताःअतएवोत्खाताःपूर्वंउन्मूलिताअपिप्रतिरोपिताःपश्चात्स्थापिताःतेवंगाःकलमाइवशालिविशेषाइव शालयःकल
माद्याश्चषष्टिकाद्याश्चपुंस्यमीत्यमरः तेऽप्यापादपद्मंमूलपद्मपर्यंतं पादोबुध्नेतुरीयांशेशैलप्रत्यंतपर्वतेइतिविश्वः उत्खातप्रतिरोपिता-
श्चतंरघुं फलैर्धनैः अन्यत्रसस्यैः संवर्धयामासुः फलंफलेधनेबीजेनिष्पत्तौभोगलाभयोःसस्यइतिकेशवः ३७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सइति सरघुः बद्धाद्विरदाएवसेतवोयैस्तैः सैन्यैः कपिशांनामनदीं करभामितिकेचित्पठंतितिर्तीर्त्वा उत्कलैराजभिरादर्शितपथः दर्शितमा
र्गःसन् कलिंगाभिमुखोययौ ३८ सइति सरघुःमहेंद्रस्यकुलपर्वतविशेषस्य महेंद्रोमलयःसह्यः शक्तिमानृक्षपर्वतः विंध्यश्चपा
रियात्रश्चसप्तैतेकुलपर्वताइतिविष्णुपुराणात् मूर्ध्नितीक्ष्णंदुःसहं प्रतापं यंतासारथिः गंभीरवेदिनोद्विरदस्य गजविशेषस्यमूर्ध्नि

सतीर्त्वाकपिशांसैन्यैर्बद्धद्विरदसेतुभिः उत्कलादर्शितपथः कलिंगाभिमुखोययौ ३८ सप्रतापंमहेंद्रस्य
मूर्ध्नितीक्ष्णंन्यवेशयत् अंकुशंद्विरदस्येवयंतागंभीरवेदिनः ३९ प्रतिजग्राहकालिंगस्तमस्त्रैर्गजसाधनः
पक्षच्छेदोद्यतंशक्रं शिलावर्षीवपर्वतः ४० तीक्ष्णंनिशितमंकुशमिव न्यवेशयत्निक्षिप्तवान् त्वग्भेदाच्छोणितस्रा
वान्मांसस्यमथनादपि आत्मानंयोनजानातिसःस्याद्गंभीरवेदनइतिराजपुत्रीये चिरकालेनयोवेत्तिशिक्षांपरिचितामपि गंभीरवेदी
विज्ञेयः सगजोगजवेदिभिरितिमृगचर्मीये ३९ प्रतीति गजसाधनःसन् कालिंगःकलिंगानांराजा व्द्यञ्मगधकलिंगसूरमसा
दणित्यण्प्रत्ययः अस्त्रैरायुधैः तंरघुं पक्षाणांछेदेउद्यतंउद्युक्तंशक्रं शिलावर्षीपर्वतइव प्रतिजग्राह अभियुक्तवान् ४० ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्विषामिति॥ काकुत्स्थोरघुः तत्रमहेंद्राद्रौ द्विषांनाराचदुर्दिनं नाराचानां बाणविशेषाणां दुर्दिनं लक्षणयावर्षमुच्यते विषह्यसहित्वासद्य
थाशास्त्रंमंगलस्नानइवविजयमंगलार्थंअभिषिक्तइवजयश्रियंप्रतिपेदेप्राप॥ यत्तुसर्वौषधिस्नानंतन्मंगलमरोचकमितियादवः
४१ तांबूलीनामिति॥ तत्रमहेंद्राद्रौयुध्यंतइतियोधाः पत्राद्यन्नैः रचिताः कल्पिताः आपानभूमयः पानयोग्यप्रदेशायैस्तेतथोक्ताः सं

द्विषांविषह्यकाकुत्स्थस्तत्रनाराचदुर्दिनम्॥ सन्मंगलस्नातइवप्रतिपेदेजयश्रियम्॥ ४१॥
तांबूलीनांदलैस्तत्ररचितापानभूमयः॥ नारिकेरासवंयोधाःशात्रवंचपपुर्यशः॥ ४२॥
गृहीतप्रतिमुक्तस्यसधर्मविजयीनृपः॥ श्रियंमहेंद्रनाथस्यजहारनतुमेदिनीम्॥ ४३॥

तः नारिकेरासवंनारिकेलमद्यं॥ तांबूलीनांनागवल्लीनांदलैःपपुः तत्रविजह्रुरित्यर्थः॥ शात्रवंयशश्चपपुर्जह्रुरित्यर्थः॥ ४२॥
गृहीतेति॥ धर्मविजयीधर्मार्थंविजयशीलः सनृपोरघुः गृहीतश्चासौप्रतिमुक्तस्तस्यमहेंद्रनाथस्य कालिंगस्यश्रियंजहार-
धर्मार्थमितिभावः॥ मेदिनींतुनजहारशरणागतवात्सल्यादितिभावः॥ ४३॥ ॥ ७॥ ॥ ६७॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ततइति ततः प्राचीविजयानंतरंफलवत्पूगमालिनाफलितक्रमुकश्रेणिमता ग्रीष्यादित्वादिनिप्रत्ययः वेलायाःसमुद्रकूलस्यतटेनोपांत्येनै॰
वअगस्त्येनाचरितामाशांदक्षिणांदिशंअनाशास्यजयःअयत्नसिद्धत्वात् अप्रार्थनीयजयःसन् ययौ अगस्त्योदक्षिणामाशामाश्रित्यन
भसिस्थितः॥ वरुणस्यात्मजोयोगी विंध्यवातापिमर्दनइतिवायुपुराणे ४४ सइति सरघुः गजानांदानेनमदेनस्रुगंधिनासुरभिगंधि॰
ना गंधस्येत्यादिनाइकारादेशः समासांतः यद्यपिगंधस्येत्वेतदेकांतग्रहणंकर्तव्यमितिनैसर्गिकगंधविवक्षायामेवेकारादेशः तथा

ततोवेलातटेनैवफलवत्पूगमालिना अगस्त्याचरितामाशामनाशास्यजयोययौ ४४ ससैन्यपरिभोगेनग
जदानस्रुगंधिना कावेरींसरितांपत्युःशंकनीयामिवाकरोत् ४५

पिनिरंकुशाःकवयः तथामाघकाव्ये वव्रुरयुक्छद॰
गुच्छसुगंधयःसततगास्ततगानगिरोलिभिः नैषधेच अपांहितृप्रायनवारिधाराःस्वादुःस्रुगंधिःस्वदतेतुषारेति नकर्मधारयान्मत्व॰
र्थीयइतिनिषेधादिनिप्रत्ययपक्षोपिजघन्यएव सेनायांसमवेताःसैन्याः सेनायांसमवेतायेसैन्याःसामाजिकाश्चतेइत्यमरः सेनायावे॰ १
तिण्यप्रत्ययः सैन्यानांपरिभोगेनकावेरींनामसरितंसरितांपत्युःसमुद्रस्यशंकनीयामविश्वसनीयामिवाकरोत् संभोगलिंगदर्शनाद्भर्तुर॰
विश्वासोभवतीतिभावः ४५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

बलैरिति विजिगीषोर्जेतुमिच्छोः गताध्वनस्तस्यरघोः बलैः सैन्यैः बलंशक्तिर्बलंसैन्यमितियादवः मारीचेषुमरीचवनेषुउद्भ्रांताः परि-
भ्रांताः हारीताः पक्षिविशेषाः यासुताः तेषांविशेषाहारीतोमद्गुः कारंडवः प्लव इत्यमरः मलयाद्रेरुपत्यकाआसन्नभूमयः उपाधिभ्यां
त्यकन्नित्यादिनात्यकन्प्रत्ययः अध्युषिताः उपत्यकासूषितमित्यर्थः उपान्वध्याङ्वसइतिकर्मत्वं ४६ ससंजुरिति अश्वैः क्षुण्णानामे-

बलैरध्युषितास्तस्यविजिगीषोर्गताध्वनः मारीचोद्भ्रांतहारीतामलयाद्रेरुपत्यकाः ४६ ससंजुरश्वक्षु
ण्णानामेलानामुत्पतिष्णवः तुल्यगंधिषुमत्तेभकटेषुफलरेणवः ४७ भोगिवेष्टनमार्गेषुचंदनानांसम-
र्पितम् नास्त्रंसत्करिणांग्रैवंत्रिपदिछेदिनामपि ४८

लालताभांउत्पतिष्णवः उत्पतनशीलाः अलंकृञित्यादिनाइष्णुच्प्र-
त्ययः फलरेणवः फलरजांसि तुल्यगंधिषुसमानगंधेषुसर्वधनीत्यादिनेनोबहुव्रीहिः मत्तेभानांकटेषुगंडेषुससंजुः सक्ताः गजगंडकटौ
कटावित्यमरः ७४ भोगीति चंदनानांचंदनद्रुमाणांभोगिवेष्टनमार्गेषुसर्पवेष्टनानांनिम्नेषुसमर्पितंसंजिनम् त्रिपदीछेदिनांपादशृंख
लाछेदकानामपित्रिपदीपादबंधनमितियादवः करिणांग्रीवासुभवंग्रैवंकंठबंधनंग्रीवाभ्योण्चेत्यण्प्रत्ययः नास्त्रंसत्नस्त्रस्तमभूत् ध्रु
न्धोलुङीतिपरस्मैपदं पुषादित्वादङ् अनिदितामित्यादिनानकारलोपः ४८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दिशीति दक्षिणस्यांदिशिरवेरपितेजोमंदायतेमंदंभवति लोहितादिभ्यःक्यष्प्रत्ययः वाक्यषइत्यात्मनेपदं दक्षिणायनेतेजोमांद्यादितिभा
वः तस्यामेवदिशिपांड्याः पंडूनांजनपदानांराजानःपांड्याः पांड्योर्ड्यण्इतिड्यण्प्रत्ययः रघोःप्रतापंनविषेहिरे नसोढवंतः सूर्यविज
यिनोपिविजितवानितिनायकस्यमहानुत्कर्षोगम्यते॥ ४९॥ ताम्रपर्णीति तेपांड्याः ताम्रपर्ण्यानद्या समेतस्य संगतस्य महोदधेः

दिशिमंदायतेतेजोदक्षिणस्यांरवेरपि॥ तस्यामेवरघोःपांड्याःप्रतापंनविषेहिरे ४९ ताम्रपर्णीसमेतस्यमु-
क्तासारंमहोदधेः तेनिपत्यददुस्तस्मैयशःस्वमिवसंचितम् ५० सनिर्विश्ययथाकामंतटेष्वालीढचंदनौ
स्तनाविवदिशस्तस्याःशैलौमलयदर्दुरौ ५१ संबंधिसंचितंमुक्तासारंमौक्तिकवरं सारोबलेस्थिरांशेचन्याय्येक्लीबंवरेत्रिषु

इत्यमरः स्वंस्वकीयंसंचितंयशइवतस्मैरघवेनिपत्यप्रणिपत्यददुः यशसःशुभ्रत्वादौपम्यंताम्रपर्णीसंगमेमौक्तिकोत्पत्तिरितिप्रसिद्धं ५०
सइतिअसत्योतित्ययुग्ममेतत् असत्यविक्रमःसरघुः तटेषुसानुषुआलीढचंदनौव्याप्तचंदनद्रुमौस्तनपक्षेप्रांतेषुव्याप्तचंदनानुले- १०
पौतस्याःदक्षिणस्याःदिशःस्तनाविवस्थितौमलयदर्दुरौनामशैलौयथाकामंयथेच्छंनिर्विश्योपभुज्यनिर्वेशोभृतिभोगयोरित्यमरः
५१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उदकान्यस्यसंतीत्युदन्वानुदधिः उदन्वानुदधौचेतिनिपातः उदन्वतादूरान्मुक्तंदूरतस्त्यक्तम् स्तोकांतिकदूरार्थकृच्छ्राणिक्तेनेतिसमा
सः पंचम्याःस्तोकादिभ्यइत्यलुक् स्वस्तांशकंमेदिन्यानितंबमिवस्थितम् सत्त्वंसत्त्वाद्विंअलंघयत्रामःअतिक्रांतोवा ५२ तस्येति अपरां
तानांपाश्चात्यानांजयेउद्यतैरुद्युक्तैः अपरांतास्तुपाश्चात्यास्तेचशूर्पारकादयइतियादवः विसर्पद्भिर्गच्छद्भिस्तस्यरघोरनीकैः

असह्यविक्रमःसह्यंदूरान्मुक्तमुदन्वता नितंबमिवमेदिन्याःस्त्रस्तांशुकमलंघयत् ५२ तस्या
नीकैर्विसर्पद्भिरपरांतजयोद्यतैः रामास्त्रोत्सारितोप्यासीत्सह्यलग्नइवार्णवः ५३ भयोत्सृष्टविभू
षाणांतेनकेरलयोषिताम् अलकेषुचमूरेणुश्चूर्णप्रतिनिधीकृतः ५४ सैन्यैः अनीकंतुरणेसैन्यइति विश्वःअ
र्णवोरामस्यजामदग्न्यस्यास्त्रैरुत्सारितोपसारितोसह्यलग्नइवासीत् सैन्यांदुतीयोर्णवइवदृश्यतइतिभावः ५३ भयेति तेनरघुणा
भयेनोत्सृष्टविभूषाणां परिहृतविभूषणानां केरलयोषितामलकेषुचमूरेणुःसेनारजः चूर्णस्यकुंकुमादिरजसः प्रतिनिधीकृतः
एतेनयोषितांपलायनंचमूनांतदनुधावनंचध्वन्यते ५४ ❦ ❦ ❦ ❦

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मरुलेति मरुलानामकेरलदेशेषु काचिन्नदीसुरचीतिकेचित्पठंति तस्यामारुतेनोद्धूतस्तुस्थापितकैतकं केतकीसंबंधिरजः तद्योधं
वारवाणानां रघुभटकंचुकानां कंचुकोवारवाणोस्त्रीत्यमरः अयत्नपटवासतां अयत्नसिद्धवस्त्रवासनाद्रव्यत्वमगमत् पिष्टातः
पटवासकइत्यमरः ५५ खर्जूरीति खर्जूरीणांतृणद्रुमविशेषाणां खर्जूरः केतकीतालीखर्जूरीचतृणद्रुमाइत्यमरः स्कंधेषु प्रकांडेषु

मरुलामारुतोद्धूतमगमत्कैतकंरजः तद्योधवारवाणानामयत्नपटवासताम् ५५ खर्जूरीस्कंधनद्धानाम्
दोद्गारसुगंधिषु कटेषु करिणां पेतुः पुन्नागेभ्यः शिलीमुखाः ५६ अभ्यभूयत वाहानां चरतां गात्रसिंजितैः
वर्मभिः पवनोद्धूतराजतालीवनध्वनिः ५७

अस्त्रीप्रकांडः स्कंधः स्यान्मूलाच्छाखावधेस्तरोरित्यमरः नद्धानां बद्धानां
करिणां मदोद्गारेण मदस्रावेण सुगंधिषु गंधस्येत्यादिनाइकारः कटेषु गंडेषु पुन्नागेभ्यः पुष्पाणि पुन्नागपुष्पाणि विहायल्यब्लोपेपं
चमी शिलीमुखाः अलयः पेतुः अलिबाणौ शिलीमुखावित्यमरः ततोपिसौगंध्यातिशयादितिभावः ५६ अभ्यभूयतेति चरतांगं ११
च्छतां वाहानां वाजिनां वाजिवाहार्वगंधर्वहयसैंधवसप्तयइत्यमरः गात्रसिंजितैः गात्रेषु शब्दायमानैः कर्तरिक्तः संजितैरितिपाठः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ठः संजतेर्ण्यंतात्कर्मणिक्तः वर्मभिः कवचैः पवनेनउद्धूतानांकंपितानांराजतालीवनानांध्वनिरभ्यभूयततिरस्कृतः ५७ अवकाश
मितिउदन्वानुदधिः रामायजामदग्न्याय अभ्यर्थितोयाचितःसन् अवकाशंस्थानंददौ रघवेतु अपरांतमहीपालव्याजेन करंब
लिंददौ बलिहस्तांशवः कराइत्यमरः अपरांतानांसमुद्रमध्यदेशत्वात्तैर्दत्तेकरेसमुद्रदत्तत्वोपचारः करदानंतुभीत्या नतुयां

अवकाशंकिलोदन्वान्रामायाभ्यर्थितोददौ अपरांतमहीपालव्याजेनरघवेकरं ५८ मत्तेभरदनोत्कीर्णव्य
क्तविक्रमलक्षणम् त्रिकूटमेवतत्रोच्चैर्जयस्तंभंचकारसः ५९ पारसीकांस्ततोजेतुंप्रतस्थेस्थलवर्त्मना
इंद्रियाख्यानिवरिपूंस्तत्वज्ञानेनसंयमी ६०

च्चयेनिरामाद्रघोरुत्कर्षः ५८ मत्तेति तत्ररघुःमत्तानामिभानांरदनोत्की
र्णानिदंतक्षतान्येव भावेक्तः व्यक्तानिस्फुटानिविक्रमलक्षणानिपराक्रमचिन्हानिविजयवर्णावलिस्थानानियस्मिन्तंतथोक्तं
त्रिकूटमेवमुच्चैर्जयस्तंभंचकार गाढप्राकारस्त्रिकूटोद्रिरेवोत्कीर्णस्तंभइवरघोर्जयस्थापकोभूदित्यर्थः ५९ पारसीकानितिततः
सरघुः संयमीयोगी तत्वज्ञानेनेंद्रियाख्या नइंद्रियनामकान्रिपूनिवपारसीकान्राज्ञः जेतुंस्थलवर्त्मना प्रतस्थे नतुनेदिष्ठेनापि
जलपथेनसमुद्रयानस्यनिषिद्धत्वादितिभावः ६०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यवनीति सरघुः यवनीनांयवनस्त्रीणां जातेरस्त्रीविषयाद्योपधादितिङीष् मुखानिपद्मानीवमुखपद्मानि उपमितसमासः ते षांमधुनामद्येमयोमदोमदरागः कार्यकारणयोरभेदेननिर्देशः तंनसेहे कथमिव अकालेप्रावृड् व्यतिरिक्तकालेजलदोदयः प्रावृषिपद्मविकासस्याप्रसक्तत्वात् अब्जानांसंबंधिनंबालातपमिव अब्जाहितत्वादब्जसंबंधित्वम् सोरातपस्य ६१ सं

यवनीमुखपद्मानांसेहेमधुमदंनसः बालातपमिवाब्जानामकालजलदोदयः ६१
संग्रामस्तुमुलस्तस्यपाश्चात्यैरश्वसाधनैः शार्ङ्गकूजितविज्ञेयप्रतियोधेरजस्यभूत् ६२

ग्रामइति तस्यरघोःअश्वसाधनैःपश्चाद्भवैःपाश्चात्यैर्यवनैःसह दक्षिणापश्चात्पुरसस्त्यक् सहार्थेतृतीया शृंगाणांविकाराः शार्ङ्गाणिधनूंषितेषांकूजितैःशब्दैः अथवाशार्ङ्गैःशृंगसंबंधिभिः कूजितैर्विज्ञेयाः अनुमेयाःप्रतियोधाः प्रतिभटायस्मि न्तस्मिन् रजसितुमुलःसंग्रामःसंकुलंयुद्धमभूत् तुमुलंरणसंकुलमितिविश्वः ६२ ७ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्रेति तत्रोदीच्यांदिशिभर्तृषुव्यक्तविक्रमं भर्तृवधेनस्फुटपराक्रममित्यर्थः रघुचेष्टितंरघुव्यापारः हूणाजनपदाःक्षत्रियास्तेषामवरोधाः
अंतःपुरस्त्रियः तेषांकपालेषुपाटलस्यपाटलिम्नः ताडनादिकृतारुण्यस्यआदेशिउपदेशकंबभूव अथवापाटलआदेशीआदेष्टायस्यतद्
भूवस्त्रयंलैरव्यायतइत्यर्थः ६८ कंबोजाइति कंबोजाराजानः समरेतस्यरघोःवीर्यंसोढुमनीश्वराः अशक्ताःसंतः गजानांमालाबंधनंभा-

तत्रहूणावरोधानांभर्तृषुव्यक्तविक्रमं कपोलपाटलादेशिबभूवरघुचेष्टितम् ६८ कंबोजाःसमरेसोढुंतस्यवीर्य
मनीश्वराः गजालानपरिक्लिष्टैरक्षोटैःसार्धमानताः ६९ तेषांसदश्वभूयिष्ठास्तुंगद्रविणराशयः उपदाविवि
शुः शश्वन्नोत्सेकाः कोसलेश्वरं ७०

वेत्युडिविभाषालीयतेरित्यालंतेनपरिक्लिष्टैः परिक्षतैःअक्षोटैर्वृक्षविशेषैः सार्धमा
नताः ६९ तेषामिति तेषांकांबोजानांसद्भिरश्वैःभूयिष्ठाःतुंगाः द्रविणानांहिरण्यानां हिरण्यंद्रविणंद्युम्नमित्यमरः राशयएवोपदाःउपा-
यनानि उपायनमुपग्राह्यमुपहारस्तथोपदेत्यमरः कोसलेश्वरंतंरघुंशश्वदसकृद्विविशुः मुहुर्मुहुःपुनःशश्वदभीक्ष्णमसकृत्समाइत्यमरः
तथापिउत्सेकाःगर्वास्तेनविविशुः सत्यपिगर्वकारणेनजगर्वेत्यर्थः विविशुस्तंविशांनाथमुदन्वंतमिवापगाः इतिपाठांतरेआपगानद्यःउदन्वं
तंसमुद्रमिवविशांनाथंनरपुंविविशुरिति ७० ९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ततइतिततोनंतरंअश्वसाधनःसन् गौर्याःगुरुंपितरंशैलंहिमवंतं उद्धूतैरश्वखुरोद्धूतैः धातूनांगैरिकादीनांरेणुभिः तत्कूटान्तस्यशृंगाणि कूटोऽस्त्रीशिखरंशृंगमित्यमरः वर्धयन्निवआरुरोह उत्पतद्धूलिदर्शनाद्गिरिशिखरवृद्धिभ्रमोजायतइतिभावः ७१ शशंसेति तुल्यसत्वानांसैन्यसमानबलानांगुहासुशेरतेइतिगुहाशयाः अधिकरणेशेतेइत्यच्प्रत्ययः तेषां दरीतुकंदरोवास्त्रीदेवखातबिलेगुहेत्यम

ततोगौरीगुरुंशैलमारुरोहाश्वसाधनः वर्धयन्निवतत्कूटानुद्धूतैर्धातुरेणुभिः ७१
शशंसतुल्यसत्वानांसैन्यघोषेप्यसंभ्रमं गुहाशयानांसिंहानांपरिवृत्त्यावलोकितं ७२

रः सिंहानांहरीणां सिंहोमृगेंद्रःपंचास्योहर्यक्षःकेसरीहरिरित्यमरः सिंहस्तुराशिभेदेस्यान्मृगाधिपवरिष्ठयोरितिहेमः संबंधिपरिवृत्त्यपरावृत्त्यावलोकितम् शयितैवग्रीवाभंगेनावलोकनं कर्तृसैन्यघोषेसेनाकलकले संभ्रमकारणेसत्यपिअसंभ्रमंअंतःक्षोभविरह नञःप्रसज्यप्रतिषेधेसमासइष्यते शशंसकथयामाससैन्येभ्यइत्यर्थाल्लभ्यते बाह्यचेष्टितमेवमनोवृत्तेरनुमापकमितिभावः असंभ्रांतत्वेहेतुः तुल्यसत्वानामिति नहिसमबलःसमबलाद्बिभेतीतिभावः ७२ ७ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भल्लेति सरघुर्भल्लापवर्जितैर्बाणविशेषजातैः स्नुहीदलफलोभल्लइतियादवः श्मश्रुलैः प्रवृद्धमुखरोमवद्भिः सिध्मादित्वाल्लच्प्रत्ययः तेषांपाश्चात्यानां शिरोभिः सरघाभिर्मधुमक्षिकाभिः व्याप्तैः सरघामधुमक्षिकेत्यमरः क्षुद्राः सरघाः क्षुद्राव्यंगानदीवेश्यासरघाकंटकारिकेत्यमरः शाश्वतोक्षुद्राभिः कृ तानिक्षौद्राणिमधूनि क्षौद्रंमधुनिपानीयमित्यमरः क्षुद्राभ्रमरवटरवातपादञ्जितिसंज्ञायांअञ्प्रत्ययः तेषांपटलैः स्तबकैरिवमहींतस्तार छादयामास ६२

भल्लापवर्जितैस्तेषांशिरोभिःश्मश्रुलैर्महीम् तस्तारसरघाव्याप्तैःसःक्षौद्रपटलैरिव ६३ अपनीतशिरस्त्राणाःशेषास्तंश रणंययुः प्रणिपातप्रतीकारःसंरंभोहिमहात्मनाम् ६४ विनयंतेस्मतद्योधामधुभिर्विजयश्रमम् आस्तीर्णाजिन रत्नासुद्राक्षावलयभूमिषु ६५ अपनीतेति शेषाहतशिष्टाः अपनीतशिरस्त्राणा अपसारितशीर्षण्याःसंतः शरणागतलक्षणमेतत् तंरघुं शरणंययुः तथाहि महात्मनांसंरंभः संक्षोभः प्रणिपातःप्रणतिरेवप्रतीकारोयस्यसहिमहतांपरकीयभीरुत्वमेवासह्यंनतुजीवितमितिभावः ६४ वि नयंतइति तस्यरघोर्योधाभटाः आस्तीर्णान्यजिनरत्नानिचर्मश्रेष्ठानियासुतासुद्राक्षावलयानांभूमिषु मृद्वीकागोस्तनीद्राक्षास्वाद्वीमधुरसेतिचेत्य मरः मधुभिः द्राक्षाफलप्रकृतिकैर्मद्यैः विजयश्रमं युद्धखेदंविनयंतेस्म अपनीतवंतः कर्तृस्थेचाशरीरेकर्मणीत्यात्मनेपदं लट्स्मइतिभूतार्थेलट् ६५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ततइति ततोरघुर्भास्वान्सूर्यइवशरैर्बाणैरुस्रैः किरणैरिव किरणोस्रमयूखांशुगभस्तिघृणिरश्मयइत्यमरः उदीच्यानुदग्भवान्नृपान्रसा
नुदकानीवउद्धरिष्यन्कौबेरींकुबेरसंबंधिनींदिशमुदीचींप्रतिप्रतस्थे अनेकेवशब्देनेयमुपमा यथाहदंडी एकानेकेवशब्दत्वात्सावाक्या
र्थोपमाद्विधेति ६६ विनीतेति सिंधुर्नामकाश्मीरदेशेषुकश्चिन्नदविशेषः देशेनदविशेषेब्धौसिंधुर्नासरितिस्त्रियामित्यमरः सिंधोस्तीरे

ततःप्रतस्थेकौबेरींभास्वानिवरघुर्दिशं शरैरुस्रैरिवोदीच्यानुद्धरिष्यन्रसानिव ६६
विनीताध्वश्रमास्तस्यसिंधुतीरविचेष्टनैः दुधुवुर्वाजिनःस्कंधांल्लग्नकुंकुमकेसरान् ६७

विचेष्टनैरंगपरिवर्तनैः विनीताध्वश्रमास्तस्यरघोःवाजिनोश्वाः लग्नाःकुंकुमकेसराः कुंकुमकुसुमकिंजल्कायेषाम् यद्वालग्नकुंकुमाःके
सराःसटायेषांतान् अथकुंकुमं काश्मीरजन्माग्निशिखंवरंबाल्हीकपीतनं रक्तसंकोचपिशुनंधीरलोहितचंदनमित्यमरः जटासटाकेस
रयोरितिहेमः केसरोनागकेसरः तुरंगसिंहयोःस्कंधकेशेषु बकुलद्रुमेषु पुन्नागवृक्षेकिंजल्केस्यादितिहेमः स्कंधान्कायान् स्कंधः १२
प्रकोष्ठेकायेंसेविज्ञानादिषुपंचस्कृ नृपेसमूहेचेतिहेमः दुधुवुःकंपयंतिस्म ६७ ७ ७ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भूर्जेष्विति भूर्जेषुभूर्जपत्रेषु भूर्जपत्रोशुजोभूर्जोमृदुत्वक्चर्मिकामनेनेतियादवः मर्मरः शुष्कपर्णध्वनिः मर्मरः शुष्कपर्णानामितियादवः अ
यंशुष्कादिशब्दवद्गुणिन्यपिवर्तनेप्रयोज्यनेच मर्मरैरगरुधूपगंधिभिरिति अतोमर्मरीभूताः मर्मरशब्दवंतोभूताइत्यर्थः कीचका
नांवेणुविशेषाणांध्वनिहेतवः श्रोत्रसुखावहाइतिभावः गंगासीकरिणः शीतलाइत्यर्थः मरुतोवाताः मार्गेतंसिषेविरे ७३ विश्र

भूर्जेषुमर्मरीभूताः कीचकध्वनिहेतवः गंगासीकरिणोमार्गेमरुतस्तंसिषेविरे ७३ विशश्रमुर्नमेरूणांछाया
स्वध्यास्यसैनिकाः दृषदोवासितोत्संगानिषण्णमृगनाभिभिः ७४ सरलासक्तमातंगग्रैवेयस्फुरितत्विषः
आसन्नोषधयोनेतुर्नक्तमस्नेहदीपिकाः ७५

मुरिति सैनिकाः सेनायांसमवेताः प्राग्वहतीयष्ठक्प्रत्ययः नमेरूणांसुरपु
न्नागानां छायासुनिषण्णानांदृषदुपविष्टानांमृगाणांकस्तूरीमृगाणांनाभिभिर्वासितोत्संगाः सुरभिततलाः दृषदः शिलाः अध्यास्यअ
धिष्ठायविशश्रमुः विश्रांताः ७४ सरलेति सरलेषुदेवदारुविशेषेषु आसक्तानियानिमातंगानांगजानांग्रीवासुभवानिग्रैवेयाणि कंठ
शृंखलानि ग्रीवाभ्योण्चेतिचकाराड्ढञ्प्रत्ययः तेषुस्फुरितत्विषः प्रतिफलितभासः ओषधयः नक्तंज्वलंतोलताविशेषाः नेतुर्नायक
स्यरघोः अस्नेहदीपिकाः तैलनिरपेक्षाः प्रदीपाआसन् ७५ ७

तस्येति तस्यरघोरुत्सृष्टेषुउज्झितेषुनिवासेषुसेनानिवेशेषु कंठरज्जुभिः गजग्रैवेयैः क्षतानिघृष्टाः त्वचोयेषांतेदेवदारवः किराते-
भ्योवनचरेभ्यः गजानांवर्ष्मप्रमाणं वर्ष्मदेहप्रमाणयोरित्यमरः शशंसुः कथितवंतः देवदारुस्कंधत्वक् क्षतैर्गजानामोन्नत्यमनुमी
यतइत्यर्थः ७६ तत्रेति तत्रहिमाद्रौ रघोःपर्वतेभवैः पार्वतीयैः पर्वताच्छइति छः गणैरुत्सवसंकेताख्यैःसप्तभिःसहगुणानुत्स

तस्योत्सृष्टनिवासेषु कंठरज्जुक्षतत्वचः गजवर्ष्मकिरातेभ्यःशशंसुर्देवदारवः ७६ तत्रजुद्धंरघोर्घोरंपार्व
तीयैर्गणैरभूत् नाराचक्षेपणीयाश्मनिष्पेषोत्पतितानलं ७७ शरैरुत्सवसंकेतान्सकृत्वाविरतोत्सवा
न् जयोदाहरणंबाह्वोर्गापयामासकिन्नरान् ७८

वसंकेतानजनयत् सप्तपांडवइतिमहाभारते नाराचानांबाणविशे-
षाणांक्षेपणीयानांभिंदिपालानामश्मानांचनिष्पेषेणसंघर्षेणउत्पतिता अनलायस्मिन्तथोक्तं क्षेपणीयोभिंदिपालः स्वगोदीर्घो-
महाफलःइतियादवः घोरंभीमंजन्यंयुद्धमभूत् युद्धमायोधनंजन्यमित्यमरः ७७ शरैरिति सरघुः शरैर्बाणैःउत्सवसंकेतान्नामगणान् १५
विरतोत्सवान्कृत्वाजित्वेत्यर्थः किन्नरान्बाह्वोःस्वभुजयोर्जयोदाहरणंजयस्यापकंप्रबंधविशेषंगाययामास गतबुद्धीत्यादिनाकिन्नरा
णांकर्मत्वम् ७८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

परस्परेणेति तेषुगणेषुउपायनयुक्ताःपाणयोयेषांतेषुसत्सु परस्परेणान्योन्यं राज्ञाहिमवतःसारोधनरूपोविज्ञातः हिमाद्रिणाराज्ञः-
सारोबलरूपोविज्ञातः एतेननत्रत्यवस्तूनामनर्घ्यत्वंगणानामभूतपूर्वःपराजयइतिध्वन्यते ७९ तत्रेति सरघुः तत्रहिमाद्रौ अक्षोभ्यमप्र
धृष्यंयशोराशिंनिवेश्यनिधायपौलस्त्येनरावणेनतुलितस्यचालितस्यअद्रेःकैलासस्यह्रियमादधानोजनयन्निवारुरोह कैलासंगत्वैव

परस्परेणविज्ञातस्तेषूपायनपाणिषु राज्ञाहिमवतःसारोराज्ञःसारोहिमाद्रिणा ७९ तत्राक्षो
भ्यंयशोराशिंनिवेश्यावरुरोहसः पौलस्त्यतुलितस्याद्रेरादधानइवह्रियम् ८० चकंपेतीर्ण
लौहित्येतस्मिन्प्राग्ज्योतिषेश्वरः तद्गजालानतांप्राप्तैःसहकालागरुद्रुमैः ८१

प्रतिनिवृत्तइत्यर्थः नहिशूराःपरेणपराजितंअभियुंजतइतिभावः ८० चकंपइति तस्मिन्रघौतीर्णालौहित्यानामनदीये
नतस्मिन् तीर्णलौहित्येसति प्राग्ज्योतिषांजनपदानामीश्वरः तस्यरघोर्गजानामालानतांप्राप्तैः कालागरुद्रुमैः कृष्णागरु-
वृक्षैः सहचकंपेकंपितवान् ८१ ❦ ❦ ❦ ❦ ❦

रघु.टी नेतिस प्राग्ज्योतिषेश्वरः रुद्धार्कमावृतसूर्यं अ धारावर्षंचत द्दुर्दिनंच धारावृष्टिं विनादुर्दिनीभूतं अस्यरघोः रथवर्त्मरजोपिनप्रसे- स.
१६ हे पताकिनीकृतएवप्रसेहे नकुतोपीत्यर्थः ८२ तमिति कामरूपाणांनामदेशानामीशः प्रभुः अत्याखंडलविक्रमं अतींद्रियपराक्रमं ४
तंरघुं भिन्नाः स्रवन्मदाः कटाः गंडाः येषांतैर्नागैर्गजैः साधनैः भेजे नागान्दत्वाशरणंगतइत्यर्थः कीदृशैर्नागैः येर्नागैरन्यान् रघु-

नप्रसेहेसरुद्धार्कमधारावर्षदुर्दिनम् रथवर्त्मरजोप्यस्यकुत एवपताकिनीम् ८२
तमीशः कामरूपाणामत्याखंडलविक्रमं भेजेभिन्नकटैर्नागैरन्यानुपरुरोधयैः ८३
कामरूपेश्वरस्तस्यहेमपीठाधिदेवताम् रत्नपुष्पोपहारेण छायामानर्चपादयोः ८४

व्यतिरिक्तान् नृपानुपरुरोधशूराणामपिशूरोरघुरितिभावः ८३ कामरूपेति कामरूपेश्वरः हेमपीठस्याधिदेवतांत स्यरघोः पाद १६
योः छायांकनकमयपादपीठव्यापिनीं कांतिं रत्नान्येवपुष्पाणि तेषामुपहारेणसमर्पणेन आनर्च अर्चयामास ८४ ६२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इतीति जिष्णुःजयनशीलः ग्लाजिस्थश्चक्स्नुरिति क्स्नुप्रत्ययः सरघुःइतीत्थंदिशोजित्वारथैरुद्धतंरजः छत्रशून्येषु रघोरेक
छत्रकत्वादितिभावः राज्ञांमौलिषुविश्रामयन् संक्रामयन्नित्यर्थः मितांह्रस्वइतिसूत्रेवाचित्तविरागेइत्यतोवेत्यनुवर्त्यव्यवस्थि
तविभाषाश्रयणेनह्रस्वोनेतिवृत्तिकृत् न्यवर्त्ततनिवृत्तः ८५ सइति सरघुःसर्वस्वंदक्षिणायस्यतंसर्वस्वदक्षिणम् विश्व

इतिजित्वादिशोजिष्णुर्न्यवर्त्ततरथोद्धतम् रजोविश्रामयन्राज्ञांछत्रशून्येषुमौलिषु ८५
सविश्वजितमारेभेयज्ञंसर्वस्वदक्षिणम् आदानंहिविसर्गायसतांवारिमुचामिव ८६

जित्सर्वस्वदक्षिणइतिश्रुतेः विश्वजितंनामयज्ञंआरेभे आजन्हेकृतवानित्यर्थः युक्तंचैतदित्याह सतांसाधूनांवारिमुचांमेघाना-
मिव आदानमर्जनं विसर्गाय त्यागायहिपात्रविनियोगायेत्यर्थः ८६ ७ ७ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सत्रांतइति काकुत्स्थोरघुः सत्रांतेयज्ञांते सत्रमाच्छादनेयज्ञेसदादानेधनेपिचेत्यमरः सचिवानांसखाइतिसचिवसखः सन् ते

षामत्यंतानुसरणद्योतनार्थं राज्ञः सखित्वव्यपदेशः राजाहःसखिभ्यष्टच् गुर्वीभिर्महतीभिः पुरस्क्रियाभिः पूजाभिः शमि·

तंपराजयेनव्य— लीकं दुःखंवैलक्ष्यंवातद्येषांतान् दुःखेवैलक्ष्येव्यलीकमित्यादवः चिरविरहेणोत्सुकाः उत्कंठिताः अ·

सत्रांतेसचिवसखः पुरस्क्रियाभिर्गुर्वीभिः शामितपराजयव्यलीकान्
काकुत्स्थश्चिरविरहोत्सुकावरोधान्राजन्यान्स्वपुरनिवृत्तयेनुमेने ८७

वरोधाअंतःपुरांगनायेषांतान् राज्ञोःपत्यानिराजन्याः क्षत्रियाः तान् राजश्वशुरादितिजातोयत्प्रत्ययः मूर्धाभिषिक्तोराजन्यो· १७

बाहुजः क्षत्रियोविराडित्यमरः स्वपुरंप्रतिनिवृत्तये प्रतिगमनायानुमेने अनुज्ञातवान् ८७ ७ २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नइति नेराजान:रेखाएवध्वजाश्चकुलिशानिचातपत्राणिच ध्वजाकारारेखाइत्यर्थः तानिचिन्हानियस्मिन् तथोक्तम् प्रसादे
नैवलभ्यंप्रसादलभ्यं सम्राजःसार्वभौमस्यरघोश्चरणयुगं प्रस्थानेप्रयाणसमयेयाःप्रणतयोनमस्काराः ताभिः करणेःअंगु
लीषुमौलिकेषुकेशबंधेषुयाःस्रजोमाल्यानिताभ्यश्च्युतैः मकरंदैःपुष्परसैः मकरंदःपुष्परसइत्यमरः रेणुभिःपरागैश्च परा·

नेरेखाध्वजकुलिशातपत्रचिन्हंसम्राजश्चरणयुगंप्रसादलभ्यम् प्रस्थानप्रणतिभिरंगुलीषुचक्रुर्मौ
लिस्रक्च्युतमकरंदरेणुगौरं ८८ इतिश्रीरघुवंशेमहाकाव्ये॰ रघुदिग्विजयोनामचतुर्थःसर्गः४

गःक्रमनोरजइत्यमरः गौरंगौर वर्णचक्रुः ८८ इतिश्रीपदवाक्यप्रमाणपारावारी[illegible]णकोला॰ संजीवनीसमाख्यायांचतुर्थःसर्गः४
हेंपुस्तकमुंबईत बापूसदाशीवशेटशेट्येहेंगिष्टेश्रीवर्धनकरयाणींआपले छापखान्यांत छापिलें शके१७८२रौद्रनामसंवत्सरे ५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥इतिरघुवंशेमहाकाव्येचतुर्थः सर्गः समाप्तः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=06.12.19 12:50
,TRANSFERRED=2019/12/06 at 12:55:16
,PAGES=37
,TYPE=STD
,NAME=S0002307
,Book Name=
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection